# १८. पादुका सहस्रम् - मुक्ता पद्धतिः (५०)

बद्धानां यत्र नित्यानां मुक्ताना मीश्वरस्य च ।
प्रत्यक्षं शेषशेषित्वं सा मे सिद्ध्यतु पादुका ॥ १८.१॥ ६११॥

तव रङ्गधुरीण पादरक्षे
विमला मौक्तिक पद्धति र्विभाति ।
सुहृदि त्वयि साधितापवर्गैः
समये सङ्क्रमितेव साधुकृत्या ॥ १८.२॥ ६१२॥

शरणागत सस्य मालिनीयं तव मुक्तामणि रश्मि निर्झरौघैः ।
ननु रङ्गधुरीण पादरक्षे जगती नित्यमदैव मातृकाऽभूत् ॥ १८.३॥ ६१३॥

अधिविष्णुपदं परिस्फुरन्ती
नव मुक्तामणि निर्मल प्रकाशा ।
परिपुष्यसि मङ्गलानि पुंसां
प्रतिपच्चन्द्रकलेव पादुके त्वम् ॥ १८.४॥ ६१४॥

निहिता नव मौक्तिकावलि स्त्वां
अभितः काञ्चन पादुके मुरारेः ।
नख चन्द्रमसां पदाश्रितानां
प्रतिमाचन्द्र परम्परेव भाति ॥ १८.५॥ ६१५॥

समता मुपैति वपुषाऽपि सदा
भवदीय मौक्तिक महश्छुरिता ।
हरिपादुके हरिपदोद्भवया
कनकापगा सुर पुरापगया ॥ १८.६॥ ६१६॥

तव रङ्गचन्द्र तपनीय पादुके
विमला समुद्वहति मौक्तिकावलिः ।
चरणारविन्द नख चन्द्रमण्डल-
प्रणयोपयात नव तारका रुचिम् ॥ १८.७॥ ६१७॥

चन्द्रचूड मकुटेन लालिता चारु मौक्तिक मयूख पाण्डरा ।
रङ्गनाथ पदपद्म सङ्गिनी लक्ष्यसे सुरधुनीव पादुके ॥ १८.८॥ ६१८॥

ये भजन्ति भवतीं तवैव ते मौक्तिक द्युति विकल्प गङ्गया ।
वर्धयन्ति मधुवैरि पादुके मौलिचन्द्र शकलस्य चन्द्रिकाम् ॥ १८.९॥ ६१९॥

मुक्तामयूखै र्नियतं त्वदीयैः आपूरयिष्य न्नवतंस चन्द्रम् ।
बिभर्ति रङ्गेश्वर पादरक्षे देवो महान् दर्शित सन्नतिस्त्वाम् ॥ १८.१०॥ ६२०॥

परिष्कृता मौक्तिक रश्मिजालैः पदस्य गोप्त्री भवती मुरारेः ।
भवत्य नेकोर्मि समाकुलानां पुंसां तमस्सागर पोतपात्री ॥ १८.११॥ ६२१॥

रङ्गेश पाद प्रतिपन्न भोगां रत्नानुविद्धै र्महितां शिरोभिः ।
मुक्तावदातां मणिपादुके त्वां मूर्तिं भुजङ्गाधिपतेः प्रतीमः ॥ १८.१२॥ ६२२॥

मुकुन्द पादावनि मौक्तिकैस्ते ज्योत्स्नामयं विश्वमिदं दिवाऽपि ।
वैमानिकानां न भजन्ति येन व्याकोचता मञ्जलि पद्मकोशाः॥१८.१३॥६२३॥

समाश्रिताना मनघां विशुद्धिं
त्रासव्यपायं च वितन्वती त्वम् ।
सायुज्य मापादयसि स्वकीयैः
मुक्ताफलै र्माधव पादुके नः ॥ १८.१४॥ ६२४॥

अवैमि पादावनि मौक्तिकानां
कीर्णामुदग्रैः किरण प्ररोहैः ।
यात्रोत्सवार्थं विहितां मुरारेः
अभङ्गुरा मङ्कुर पालिकां त्वाम् ॥ १८.१५॥ ६२५॥

शिवत्वहेतुं सकलस्य जन्तोः
स्रोतो विशेषैः सुभगा मसङ्ख्यैः ।
मुक्ता मयूखैः सुरसिन्धु मन्यां
पुष्णासि रङ्गेश्वर पादुके त्वम् ॥ १८.१६॥ ६२६॥

रङ्गेशयानस्य पदावनि त्वां
लावण्य सिन्धोः सविधे निषण्णाम् ।
परिस्फुरन् मौक्तिकजाल दृश्यां
प्रसूतिभिन्नां प्रतियन्ति शुक्तिम् ॥ १८.१७॥ ६२७॥

अवैमि रङ्गेश्वर पादरक्षे
मुक्ता फलानि त्वयि निस्तुलानि ।
तेनैव कल्पान्तर तारकाणां
उप्तानि बीजानि जगद्विधात्रा ॥ १८.१८॥ ६२८॥

विक्रम्यमाण मभवत् क्शण मन्तरिक्षं
मायाविना भगवता मणिपादरक्षे ।
व्योमापगा विपुल बुद्बुद दर्शनीयैः
मुक्ताफलैस्तव शुभैः पुनरुक्ततारम् ॥ १८.१९॥ ६२९॥

लक्ष्मी विहार रसिकेन पदावनि त्वं
रक्षाविधौ भगवता जगतो नियुक्ता ।
सत्त्वं तदर्हमिव दर्शयसि प्रभूतं
मुक्ता मयूख निकरेण विसृत्वरेण ॥ १८.२०॥ ६३०॥

पादार्पणेन भवतीं प्रतिपद्यमाने
श्रीरङ्ग चन्द्रमसि सम्भृत मौक्तिकश्रीः ।

अङ्गीकरोषि चरणावनि कान्ति मग्र्यां
	उद्भिद्यमान कुमुदेव कुमुद्वती त्वम् ॥ १८.२१॥ ६३१॥

त्रय्यन्त हर्म्य तलवर्ण सुधायितेन
	ज्योत्स्ना विकल्पित रुचा मणिपादुके त्वम् ।
मुक्तामयी मुरभिदङ्घ्रि सरोज भाजां
	वर्णेन ते शमयसीव सतामवर्णम् ॥ १८.२२॥ ६३२॥

वैकुण्ठ पाद नख वासनयेव नित्यं
	पादावनि प्रसुवते तव मौक्तिकानि ।
अच्छिन्न ताप शमनाय समाश्रितानां
	आलोक मण्डल मिषा दमृत प्रवाहम् ॥ १८.२३॥ ६३३॥

रामानुवृत्ति जटिले भरतस्य मौलौ
	रङ्गाधिराज पद पङ्कज रक्षिणि त्वम् ।
एकातपत्रित जगत्रितया द्वितीयं
	मुक्तांशुभिः कृतवती नव मातपत्रम् ॥ १८.२४॥ ६३४॥

पादावनि स्फुट मयूख मधु प्रवाहा
	मुग्धा परिस्फुरति मौक्तिक पद्धतिस्ते ।
रूढस्य रङ्गपति पाद सरोज मध्ये
	रेखात्मनः सुरतरो रिव पुष्प पङ्क्तिः ॥ १८.२५॥ ६३५॥

आम्रेडितैः पद नखेन्दु रुचा मनोज्ञैः
मुक्तांशुभि र्मुरभिदो मणिपादुके त्वम् ।
स्वाभाविकीं सकल जन्तुषु सार्वभौमीं
प्रायः प्रसक्ति ममलां प्रकटि करोषि ॥ १८.२६॥ ६३६॥

निस्सीम पङ्क मलिनं हृदयं मदीयं
नाथस्य रङ्ग वसते रधिरोढु मिच्छोः ।
मातस्तवैव सहसा मणिपादरक्षे
मुक्तांशवः स्फटिक सौधतुलां नयन्ति ॥ १८.२७॥ ६३७॥

श्यामा तनु र्भगवतः प्रतिपन्न तारा
त्वं चन्द्रिका विमल मौक्तिक दर्शनीया ।
स्थाने तदेत दुभयं मणिपादरक्षे
बोधं क्षणान्नयति बुद्धि कुमुद्वतीं नः ॥ १८.२८॥ ६३८॥

उद्गाढ पङ्क शमनै र्मणिपादरक्षे
मुक्तांशुभि र्मुरभिदो नख रश्मि भिन्नैः ।
चूडापदेषु निहिता त्रिदशेश्वराणां
तीर्थोदकैः स्नपयसीव पदार्थिनस्तान् ॥ १८.२९॥ ६३९॥

रङ्गेश पाद नखचन्द्र सुधानुलेपं

संप्राप्य सिद्ध गुलिका इव तावकीनाः ।
संसार सञ्ज्वर जुषां मणिपादरक्षे
सञ्जीवनाय जगतां प्रभवन्ति मुक्ताः ॥ १८.३०॥ ६४०॥

भावोत्तरै रधिगता भरत प्रधानैः
प्रत्युप्त मौक्तिक मिषेण विकीर्ण पुष्पा ।
रङ्गेश्वरस्य नियतं त्वयि लास्य भाजो
रङ्गस्थलीव ललिता मणिपादुके त्वम् ॥ १८.३१॥ ६४१॥

मन्ये मुकुन्द चरणावनि मौलिदेशे
विन्यस्य देवि भवतीं विनतस्य शम्भोः ।
आपादयन्त्यधिकृताः प्रतिपन्नतारं
चूडा तुषार किरणं तव मौक्तिकौघैः ॥ १८.३२॥ ६४२॥

पद्मापते र्विहरतः प्रिय माचरन्ती
मुक्ता मयूख निवहैः पुरतो विकीर्णैः ।
कन्दानि काञ्चन पदावनि पद्मिनीनां
मन्ये विनिक्षिपसि मन्दिर दीर्घिकासु ॥ १८.३३॥ ६४३॥

आशास्य नून मनघां मणिपादरक्षे
चन्द्रस्य वारिधि सुता सहजस्य वृद्धिम् ।
धात्रीं मुकुन्द पदयो रनपायिनीं त्वां

ज्योत्स्ना समाश्रयति मौक्तिक पङ्क्ति लक्ष्यात् ॥ १८.३४॥ ६४४॥

ये नाम केऽपि भवतीं विनयावनम्रैः
उत्तंसयन्ति कृतिनः क्शण मुत्तमाङ्गैः ।
इ(ऋ)च्छन्ति रङ्गनृपते र्मणिपादरक्षे
त्वन्मौक्तिकौघ नियता मिह ते विशुद्धिम् ॥ १८.३५॥ ६४५॥

अनुदिन ललिताना मङ्गुली पल्लवानां
जनित मुकुल शोभै र्देवि मुक्ताफलै स्त्वम् ।
प्रकटयसि जनानां पादुके रङ्गभर्तुः
पदसरसिज रेखा पाञ्चजन्य प्रसूतिम् ॥ १८.३६॥ ६४६॥

बलि विमथन वेला व्यापिनस्तस्य विष्णोः
पद सरसिज माध्वी पावनी देवि नूनम् ।
जनन समय लग्नां जाह्नवी तावकानां
वहति चरणरक्षे वासनां मौक्तिकानाम् ॥ १८.३७॥ ६४७॥

मधु रिपु पद मित्रै र्वैरमिन्दोः सरोजैः
शमयितु मिव ताराः सेवमानाश्चिरं त्वाम् ।
प्रचुर किरण पूराः पादुके संश्रितानां
कलि कलुष मशेषं क्षालयन्तीव मुक्ताः ॥ १८.३८॥ ६४८॥

मुकुलित परितापां प्राणिनां मौक्तिकैः स्वैः
अमृतमिव दुहाना माद्रिये पादुके त्वाम् ।
विषधर फण पङ्क्ति र्यत् प्रभावेन मन्ये
ललित नटन योग्यं रङ्ग मासीन् मुरारेः ॥ १८.३९॥ ६४९॥

सकृदपि विनतानां त्रास मुन्मूलयन्तीं
त्रिभुवन महनीयां त्वामुपाश्रित्य नूनम् ।
न जहति निजकान्तिं पादुके रङ्गभर्तुः
चरण नखमणीनां सन्निधौ मौक्तिकानि ॥ १८.४०॥ ६५०॥

भुवनमिद मशेषं बिभ्रतो रङ्गभर्तुः
पदकमल मिदं ते पादुके धारयन्त्याः ।
चिर विहरण खेदात् सम्भृतानां भजन्ति
श्रमजल कणिकानां सम्पदं मौक्तिकानि ॥ १८.४१॥ ६५१॥

प्रकटित यशसां ते पादुके रङ्गभर्तुः
द्विगुणित नख चन्द्र ज्योतिषां मौक्तिकानाम् ।
करण विलय वेला कातर स्यास्य जन्तोः
शमयति परितापं शाश्वती चन्द्रिकेयम् ॥ १८.४२॥ ६५२॥

दिव्यं धाम स्थिर मभियतां देवि मुक्तामणीनां
मध्ये कश्चिद्भवति मधुजित्पादुके तावकानाम् ।

न्यस्तो नित्यं निजगुण गण व्यक्ति हेतो र्भवत्याम्
आत्मज्योति श्शमित तमसां योगिना मन्तरात्मा ॥ १८.४३॥ ६५३॥

शुद्धे नित्यं स्थिर परिणतां देवि विष्णोः पदे त्वां
आस्थानींताममित विभवां पादुके तर्कयामि ।
आलोकैः स्वैर्भुवन मखिलं दीपवद्व्याप्य कामं
मुक्ताः शुद्धिं यदुपसदनाद् बिभ्रति त्रासहीनाः ॥ १८.४४॥ ६५४॥

प्राप्ता शौरेश्चरणकमलं पादुके भक्तिभाजां
प्रत्यादेष्टुं किमपि वृजिनं प्रापिता मौलिभागम् ।
देवेन त्वं दशशत दृशा दन्तिराजस्य धत्से
मूर्ध्नि न्यस्ता मुखपट रुचिं मौक्तिकानां प्रभाभिः ॥ १८.४५॥ ६५५॥

तव हरिपादुके पृथुल मौक्तिक रत्नभुवः
प्रचलद मर्त्य सिन्धु लहरी सहधर्मचराः ।
पद मजरामरं विदधते कथमम्ब सतां
प्रणत सुरेन्द्र मौलि पलितङ्करणाः किरणाः ॥ १८.४६॥ ६५६॥

कपर्दे कस्यापि क्षितिधर पद त्रायिणि तथा
मुहुर्गङ्गा मन्यां क्षरति तव मुक्तामणिमहः ।
मुधारम्भः कुम्भस्थल मनुकलं सिञ्चति यथा
निरालम्बो लम्बोदर कलभ शुण्डार चुलकः ॥ १८.४७॥ ६५७॥

मुकुन्द पदरक्षिणि प्रगुण दीप्तय स्तावकाः
क्षरन्त्यमृत निर्झरं कमपि मौक्तिक ग्रन्थयः ।
मनागपि मनीषिणो यदनुषङ्गिन स्तत्क्षणात्
जरामरण दन्तुरं जहति हन्त तापत्रयम् ॥ १८.४८॥ ६५८॥

देवः श्रीपद लाक्षया तिलकित स्तिष्ठत्युपर्येव ते
गौरीपाद सरोज यावक धनी मूले समालक्ष्यते ।
इत्थं जल्पति दुर्मदान्मुरभिदः शुद्धान्त चेटीजने
प्रायस्त्वं मणिपादुके प्रहसिता मुक्ता मयूखच्छलात्॥१८.४९॥६५९॥

रङ्गेश चरण रक्षा सा मे विदधातु शाश्वतीं शुद्धिम् ।
यन्मौक्तिक प्रभाभिः श्वेतद्वीप मिव सह्यजा द्वीपम् ॥ १८.५०॥ ६६०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
मुक्ता पद्धति रष्टादशी ॥